IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# तस्मै श्री गुरवेनमः

**(Tasmai Sri Gurave Namaha)**

**डॉ.सि हेच्. पवन्कुमारः**, संस्कृते अतिथि अध्यापकः, तेलुगु&प्राच्यभाषाविभागः,
आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरः, गुण्टूरु, आन्ध्रप्रदेशः,

गुरोर्देवत्वं कस्य न विदितम् । गुरुरव अज्ञानान्धतमसं व्यवच्छिद्य ज्ञान - ज्योतिर्ज्वलयति।तत्कपयैव दिव्यदृष्टित्वं प्राप्यते ।

गुरु-शुश्रूषयैव ज्ञानावाप्तिः, यथा कपखननेन जलाधिगमः । गुरुसेवाफलं वर्ण्यते यद्गुरु-शुश्रूषयैव ब्रह्मलोकप्राप्तिर्जायते । एवं स्फटमेतद् विज्ञायते यद् गुरोः कपया आनृण्यं कथमपिनावाप्तु पार्यते । गुरोः कपयैव ऋषयो, महर्षयः, कवयः, महाकवयः विविधविद्यानिष्णाताश्चअन्तेवासिनोऽभूवन् । अतो गुरुरव सदा देववत् पूज्यः । अतः साधूच्यते -

**"तस्म श्री गरवनमः ।"**

मुख्याशाः**(Key words)**

(1) गुरुशिष्ययोः लक्षणानि (2)शिष्यधर्माः, (3)गुरु-शिष्य सम्बन्धः ।

**"संसारवृक्षमारूढाः पतन्तोनरकार्णवे ।**

**येनचैवोद्धृताः सर्वेतस्मै श्री गुरवेनमः ।।"**

## आमुखम्

**"गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते ।**

**अज्ञानग्रासकं ब्रह्म गुरुरेवन संशयः ।।"**[1]

"गु"नाम अन्धकारः, "रु"नामतेदःगुरुरेव अज्ञानग्रासकः ब्रह्मा इति श्लोकस्यार्थः । अतोगुरुर्नाम परमार्थत्त्वम्उपदिश्य मोक्षमार्गंदर्शितवान् एव इत्यर्थइत्यनेन श्लोकेन अवगम्यते।

किञ्च बोधितान् विषयान् अनुसृत्य बोधकस्य विविधनामानि मनुना प्रोक्तानि । यथा -

**"उपनीयतु यः शिष्यं वेदमध्यापयेद्द्विजः ।**

**सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ।।"**[2]इति ।

यस्य उपनयनसंस्कारंकृत्वा, शिष्यमिव स्वीकृत्य, तस्मै वेदान् वेदाङ्गान्, वेदरहस्यानि चबोधितवान् स एव आचार्यः । योह्याचारं ग्राहयति, छात्रोपयोगिषयान् संगृह्णाति, छात्रबुद्धिंविकासयति च, स आचार्यः । तदुक्तं च निरुक्ते–

**"आचार्यःकस्मात्?आचार्य आचारं ग्राहयति ।**

**आचिनोत्यर्थान् । आचिनोति बुद्धिमिति वा ।।"**[3]

किञ्च यः सदाचारशिक्षणपूर्वकं छात्रेषु जितेन्द्रियत्वं पोषयति, स आचार्य इति अथर्ववेदेच प्रोक्तम् । यथा -

**"आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।।"**[4]इति ।

ततः स्वकीयजीवनपोषणार्थं वेदेकिमप्येकं भागम् अथवा वेदाङ्गान्यपि कस्यापियोऽध्यापयति स उपाध्यायःइति मनुना उक्तम् । यथा -

**"एकदेशंतु वेदस्य वेदाङ्गान्यपि वा पुनः ।**

**योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ।।"**[5]

'गर्भादानादि समस्तानि संस्कारकर्माणि च यथाविधिकृत्वा, अन्नंदत्त्वा यः पोषयति स एवगुरुः' । निषेकादिसंस्कारकर्माणि कुमारायकृतवान्पितुरेव खलु । अतः अत्रोक्तंगुरुशब्दःजनकमुद्दिश्येव ।

**"निषेकादीनि कर्माणि यःकरोति यथाविधि ।**

**संभावयतिचान्नेन स विप्रोगुरुरुच्यते ।।"**[6]

पूर्वोक्तानि आचार्य - उपाध्यायलक्षणानि यदि परिशील्यते तर्हि वृत्त्यर्थम् अध्यापनवृत्तिंकृतःउपाध्यायात् समस्तानि शास्त्राणि संकल्य तेषां सारम् उपरिनीत्वातम् आचरणेस्थित्वा,सोऽप्याचरितवान् आचार्य एव अत्युन्नतइति वषयः स्पष्टं भवति ।

# गुरु - शिष्ययोः लक्षणानि

गुरोः, शिष्यस्य अपेक्षितानि लक्षणान्यपि शास्त्रे स्पष्टतया प्रतिपादितानि ।

श्रुतिषु प्रोक्तानिगुरुलक्षणानि संकल्य श्रीशङ्करभगवत्पादःविवेकचूडामणौ सद्गुरोःलक्षणानि । यथा–

**"श्रोत्रियोवृजिनोऽकामहतो यो ब्रह्मवित्तमः ।**

**ब्रह्मण्युपरतः शान्तोनिरिन्धनइवानलः ।।"**[7]इति ।

"उपनिषदां अध्येता पापरहितः, विषयेषु निरासक्तः, सदा आत्मविद्यारतः, काष्ठैर्विनाअग्निवत् शान्तस्वभावयुतः, ब्रह्मवादिषु श्रेष्ठतमः, सन्मार्गेजीवनयानंकृतवान् पुरुषः सद्गुरुः"इति ।

एतादृशो महापुरुष एव जीवन्मुक्तः । वस्तुतःएतादृक् महापुरुषस्य किमपि कर्तव्यानिनैवभवन्ति । अपि च लोकसंग्रहार्थं कानिचन लौकिककार्याण्यपि निर्वहन्तीति भगवद्गीतायांस्वकीयमेव दृष्टान्तरूपेण दृष्ट्वा श्रीकृष्णपरमात्मा स्वयमुक्तवान् । यथा–

**"न मे पार्थास्तिकर्तव्यं त्रिषु लोकेषु किञ्चन ।**

**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ।।"**[8]

इतिगीतायां श्रीकृष्णवचनानि परिशील्यते तर्हि आत्मज्ञानसम्पन्न एव यथार्थगुरुरित्यवगम्यते । एतादृशःगुरुः योग्यः शिष्यः स्वकीय समीपे यदागच्चतिचेत्तस्यउत्तमशिष्याय कथंविद्यां उपदिशेदिति श्रीशङ्कराचार्यःविवेकचूडामणौ उद्बोधयामास । यथा -

**"मा भैष्टविद्वंस्तवनास्त्यपायः संसारसिन्धोस्तणेऽस्त्युपायः ।**

**येनैव याताः यतयोऽस्य पारंतमेव मार्गं तवनिर्दिशामि ।।"**

**"वेदान्तार्थविचारेणजायतेज्ञानमुत्तमम् ।**

**तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु ।।"**[9]

"हे विद्वान्!भीतिं मास्तु । भवतःकोऽप्यपायोनास्ति । संसारसागरंतर्तुमेकउपायोऽस्ति । यो मार्गमनुसृत्य यतयः संसारसागरंतरन्ति स मार्गोभवता वेदान्तानां अर्थान्, नामउपनिषद्भिःप्रितपादितः आत्मतत्त्वविचारेण उत्तमज्ञानं प्राप्यते । तत्ज्ञानेन झटित्येव संसारदुःखसंपूर्णतयादूरीभवेत् ।"

एवं सद्गुरुः - विषयोऽयं अतीवक्लिष्टमित्युक्त्वाविद्याध्ययनारम्भकाले एव शिष्यं नैवभीतवहं कृत्वा, तस्य आत्मविद्याविषये अभिरुचिं प्रकल्प्य क्रमेणतस्मिन् विषये तं शिष्यंपरिपूर्णज्ञानवानिवकृत्वातस्यां विद्यायां स्वसादृशम् अकरोत् ।

वस्तुतः विषयोऽयं नकेवलं आध्यात्मिकविषये, अपि च आत्मविद्यायामपि प्रत्यक्षतया,परोक्षतया वा उपयुक्तं योग - मन्त्रोपासनादीनां विषयेऽपि सम्बन्धिताऽस्ति । शास्त्रादीनां विषये,अन्यलौकिकविद्यानां विषयेऽपि च अनुवर्तितोऽस्ति ।

बोधनीयशास्त्रेगुरोः निर्दिष्टंज्ञानं, शिष्यवात्सल्यादिकं च भेवेयुः, शिष्यस्यसंपूर्णश्रद्धा-विश्वासाश्च अवश्यं भवेयुः । एतानि सकलांविद्यानांतुल्यान्येव ।

किञ्च गुरोरिव शिष्यस्याऽपि केचन उत्तमलक्षणानि शास्त्राणि बोधयन्ति । श्रीकृष्णःअर्जुनाय बोधार्ह विषयान् सर्वान् बोधयित्वा ।

**"इदंतेनातपस्कायन भक्तायकदाचन ।**

**न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ।।"**[10]

"तुभ्यं मया उपदिष्टामिमांविद्यांतपोरहितस्य, भक्तिहीनस्य विषयममुं श्रोतुं अनासक्तस्यकदापि नैव बोधयेत् । माम् द्वेषितस्यापि नैव बोधयेत्इत्युक्तवान् ।" अर्थात्तपो-भक्ति-विनय-श्रद्धालक्षणानि एव उत्तमशिष्यस्यगुणान्यीवगीतायां सूचितानि । ज्ञानसमुपार्जनाय शिष्यःगुरोः समीपंगत्वा श्रद्धा-विनय-भक्तिभिःतंगुरं शुश्रूषयित्वा गुरोरनुग्रहं प्रापयेत् ।

## शिष्यधर्माः

दैनन्दिनजीवने गुरुशुश्रूषासमये शिष्यैः पालनीयाःधर्माः धर्मशास्त्रेषु सम्यक् निर्दिष्टाः ।यथा-

**"चोदितोगुरुणानित्यमप्रचोदित एव वा ।**
**कुर्यादध्ययने यत्मर्माचार्यस्य हितेषु च ।।**
**शरीरंचैव वाचं च बुद्धीन्द्रियमनांसि च ।**
**नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ।।**
**आस्यतामिति च प्रोक्तः सन्नासीताभिमुखंगुरोः ।**
**हीनान्नवस्त्रवेषः स्यात्सर्वदागुरुसन्निधौ ।**
**उत्तिष्ठेत्प्रथमं चास्य चरमंचैव संविशेत् ।।**
**प्रतिश्रवणसम्भाषे शयानोन समाचरेत् ।**
**नासीनोन च भुञ्जानोन तिष्ठन्न पराङ्मुखः ।।**

**नोदाहरेदस्य नाम परोक्षमपि केवलम् ।**
**नचैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ।**
**गुरोर्यत्र परीवादोनिन्दा वापि प्रवर्तते ।**

**कर्णौतत्रपिधातव्यौगन्तव्यं वा ततोऽन्यतः ।।"**[11]

शरीरं वाग्बुद्धीन्द्रियाणि च नियम्य प्राञ्जलिर्भूत्वागुरोर्मुखं वीक्षमाणो भवेत् । आस्यतामितिगुरुकथनानंतरमेवगुरोमुखंपश्यन् उपविशेत् स शिष्यः हीनान्नवस्त्रवेषस्सन्गुरुसन्दिधौ वर्तेत ।गुरु समीपे प्रथमं उत्थायचरमे संविशेत् । प्रतिश्रवणे च, संभाषे च शयानोनैव भवेत् । गुरोर्नामप्रत्यक्षे वा परोक्षे वा नोदाहरेत् । गुरु चेष्टां, गतिं, भाषितं वा नकदाप्यनुकुर्वीत । यत्रकुत्रापिगुरोःनिन्दा वा परीवादो वा प्रवर्ततेतत्रकर्णौ पिधातव्यौ । ततोऽप्यद्यत्रगन्तव्यमिति शिष्यलक्षणंमनूस्मृतिकारः सुष्ठु वर्णितः ।

## गुरु - शिष्य सम्बन्धः

आचार्य - शिष्ययोःपितापुत्रवत् सम्बन्ध आस्थीयते । उपनयनसंस्कारेण शिष्यस्य गुरोःसमीपनिवासाद् अन्तेवासित्वं संजायते । परीक्षणकालेगुरुसविधे रात्रित्रयावस्थानेन आचार्यस्यमातृत्वंनिर्दिश्यते । एवं गुरु - प्रदत्त - ज्ञानवाप्त - तेजस्वित्वं च छात्रे संलक्ष्यते । एतदेवाभिप्रेत्यप्रोच्यते अथर्वणवेदे । यथा -

**"आयार्य उपनयमानो ब्रह्मचारिणंकृणुतेगर्भमन्तः ।**

**तं रात्रीस्तिस्र उदरेबिभर्तितंजातं द्रष्टुमभिसंयन्तिदेवाः ।।"**[12]

तैत्तिरीयोपनिषदि गुरु-शिष्योस्तथा एकोद्देश्यत्वंचित्तैकत्वं च निर्दिश्यते यथाद्वयोरेवसामञ्जस्येन श्रीवृद्धिः, विद्यायाश्चतेजस्वित्वं सम्पद्यते ।

**"सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै ।**

**तेजस्वि नावधीतमस्तु मा विद्विषावहै ।।"**[13]इति ।

**सह नौ यशः । सह नौ ब्रह्मवर्चसम् ।।**

**"आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् ।**

**विद्या संधिः । प्रवचनं सन्धानम् ।।"**[14]इति ।

इत्यनेननिर्दिश्यते यद्गुरोराशीर्वादेनछात्रस्य यशः, तेजस्विभिश्छात्रैश्चगुरोर्यशःप्रथते ।गुरुशिष्ययोर्द्वयोरेव सामञ्जस्येन सद्भावेन च द्वयोरपि तेजोवृद्धिः सञ्जायते ।

एवं स्फुटमेतद्विज्ञायते यद्गुरोःकृपाया आनृण्यंकथमपि नावाप्तुं पार्यते । गुरोःकृपयैवऋषयो महर्षयःकवयो महाकवयो विविधविद्यानिष्णाताश्च अन्तेवासिनोऽभूवन् । अतोगुरुः सदादेववत् पूज्यः ।

**"आचार्यो ब्रह्मणो मूर्तिःपिता मूर्तिः प्रजापतेः ।।"**[15]

एतादृक् गुरुशुश्रूषयैन ज्ञानावाप्तिः, ब्रह्मलोकप्राप्तिश्चजायते ।

उक्तं च -

**"गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ।।"**[16]इति।

# उपसंहारः

भारतीयसंस्कृत्यांजननी-जनकयोः उभययोः स्वरूपं गुरुरिति प्रकीर्त्यते । मानवजीवनगमनेगुरोः स्थानं समुन्नतम् । अस्माकम् अज्ञानान्धकारंदूरीकृत्यविज्ञानप्रपञ्चं नीत्वाजीवनपरमार्थंबोधयित्वाइह-पर सौख्यदायकमुत्तममार्गानिर्दिश्य जीवनसाफल्याय जलधौनौरिव व्यवह्रितेगुरुः ।एतादृशःगुरुदेवस्य पादसेवनंकृत्वा वयं सर्वेऽपिधन्या भवेम ।

**"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**

**चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवेनमः ।।"**

—— oo ——

# सन्दर्भ - सङ्केताः


1. श्रीगुरुगीता - 1/33
2. मनुस्मृतिः - II/140
3. निरुक्तम् - 1/4
4. अथर्ववेदः - XI/5/17
5. मनुस्मृतिः - II/141
6. मनुस्मृतिः - II/142
7. विवेकचूडामणिः34
8. श्रीमद्भगवद्गीता - III/22
9. विवेकचूडामणिः - 45, 47
10. श्रीमद्भगवद्गीता - XVIII-67

11. मनुस्मृतिः - II/191-195, 199-200
12. अथर्ववेदः - XI/5-3
13. तैत्तिरीयोपनिषत् - II-1-1
14. तैत्तिरीयोपनिषत् - I-3-1, 3
15. मनुस्मृतिः - II/226
16. मनुस्मृतिः - II/233

# उपयुक्तग्रन्थसूची


| | | |
|---|---|---|
| 1. | श्रीगुरुगीता | स्कान्दपुराणान्तर्गत शिवपार्वती-संवाद |
| 2. | मनुस्मृतिः | सविमर्श 'मणिप्रभा' पण्डित - श्री हरगोविन्द शास्त्री हिन्दीटीकासहिता |
| 3. | यास्कनिरुक्तम | संस्कृतान्ध्रव्याख्या सहितम् - पण्डितगोपदेव् |
| 4. | चतुर्वेदसंहिता | मर्रिकृष्णारेड्डि (आन्ध्रानुवादकः) |
| 5. | श्रीशङ्कराचार्यः | विवेकचूडामणि - व्याख्यात - श्रीचन्द्रशेखरभाती श्रृङ्गेरी |
| 6. | श्रीमद्भगवद्गीता | शङ्करभाष्यसमेता - मोतीलाल् बनारसीदास् |
| 7. | तैत्तिरीयोपनिषत् | ईशादिदशोपनिषदः - मोतीलाल् बनारसीदास् श्रीशङ्करभाष्ययुता |